# antaHkaraNaprabodhaH

# અન્તઃકરણપ્રબોધઃ

## Document Information

Text title : antaHkaraNaprabodhaH

File name : antaHkaraNaprabodhaH.itx

Category : misc, puShTimArgIya, vallabhaachaarya, upadesha

Location : doc_z_misc_general

Author : vallabhAchArya

Proofread by : PSA Easwaran psawaswaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# અન્તઃકરણપ્રબોધઃ

અન્તઃકરણ મદ્વાક્યં સાવધાનતયા શ‍ૃણુ ।
કૃષ્ણાત્પરં નાસ્તિ દૈવં વસ્તુતો દોષવર્જિતમ્ ॥ ૧॥

ચાણ્ડાલી ચેદ્રાજપત્ની જાતા રાજ્ઞા ચ માનિતા ।
કદાચિદપમાનેઽપિ મૂલતઃ કા ક્ષતિર્ભવેત્ ॥ ૨॥

સમર્પણાદહં પૂર્વમુત્તમઃ કિં સદા સ્થિતઃ ।
કા મમાધમતા ભાવ્યા પશ્ચાત્તાપો યતો ભવેત્ ॥ ૩॥

સત્યસઙ્કલ્પતો વિષ્ણુર્નાન્યથા તુ કરિષ્યતિ ।
આજ્ઞૈવ કાર્યા સતતં સ્વામિદ્રોહોઽન્યથા ભવેત્ ॥ ૪॥

સેવકસ્ય તુ ધર્મોઽયં સ્વામી સ્વસ્ય કરિષ્યતિ ।
આજ્ઞા પૂર્વં તુ યા જાતા ગઙ્ગાસાગરસઙ્ગમે ॥ ૫॥

યાપિ પશ્ચાન્મધુવને ન કૃતં તદ્દ્વયં મયા ।
દેહદેશપરિત્યાગઃ તૃતીયો લોકગોચરઃ ॥ ૬॥

પશ્ચાત્તાપઃ કથં તત્ર સેવકોઽહં ન ચાન્યથા ।
લૌકિકપ્રભુવત્કૃષ્ણો ન દ્રષ્ટવ્યઃ કદાચન ॥ ૭॥

સર્વં સમર્પિતં ભક્ત્યા કૃતાર્થોઽસિ સુખી ભવ ।
પ્રૌઢાપિ દુહિતા યદ્વત્સ્નેહાન્ન પ્રેષ્યતે વરે ॥ ૮॥

તથા દેહે ન કર્તવ્યં વરસ્તુષ્યતિ નાન્યથા ।
લોકવચ્ચેત્સ્થિતિર્મે સ્યાત્કિં સ્યાદિતિ વિચારય ॥ ૯॥

અશક્યે હરિરેવાસ્તિ મોહં મા ગાઃ કથઞ્ચન ।
ઇતિ શ્રીકૃષ્ણદાસસ્ય વલ્લભસ્ય હિતં વચઃ ।
ચિત્તં પ્રતિ યદાકર્ણ્ય ભક્તો નિશ્ચિન્તતાં વ્રજેત્ ॥ ૧૦॥

ઇતિ શ્રીવલ્લભાચાર્યવિરચિતોઽન્તઃકરણપ્રબોધઃ સમાપ્તઃ ।

Proofread by PSA Easwaran

*antaHkaraNaprabodhaH*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*